# Devi Siddhapithas from Devi Bhagavatam

# देवीसिद्धपीठानि

## Document Information

Text title : Devi 108 Siddhapithas from Devi Bhagavatam

File name : devIsiddhapIThAnidevIbhAgavatam.itx

Category : devii, shaktipITha

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Description/comments : Devi Bhagavata Mahapuran Skandha 7, Adhyaya 30

Latest update : June 10, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# देवीसिद्धपीठानि

जनमेजय उवाच -
कानि स्थानानि तानि स्युः सिद्धपीठानि चानघ ।
कति सङ्ख्यानि नामानि कानि तेषां च मे वद ॥ १॥

तत्र स्थितानां देवीनां नामानि च कृपाकर ।
कृतार्थोऽहं भवे येन तद्वदाशु महामुने ॥ २॥

व्यास उवाच -
शृणु राजन्प्रवक्ष्यामि देवेपीठानि साम्प्रतम् ।
येषां श्रवणमात्रेण पापहीनो भवेन्नरः ॥ ३॥

येषु येषु च पीठेषूपास्येयं सिद्धिकाङ्क्षिभिः ।
भूतिकामैरभिध्येया तानि वक्ष्यामि तत्त्वतः ॥ ४॥

वाराणस्यां विशालाक्षी गौरीमुखनिवासिनी ।
क्षेत्रे वै नैमिषारण्ये प्रोक्ता सा लिङ्गधारिणी ॥ ५॥

प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने ।
मानसे कुमुदा प्रोक्ता दक्षिणे चोत्तरे तथा ॥ ६॥

विश्वकामा भगवती विश्वकामप्रपूरणी ।
गोमन्ते गोमती देवी मन्दरे कामचारिणी ॥ ७॥

मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे ।
गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ॥ ८॥

एकाम्रपीठे सम्प्रोक्ता देवी सा कीर्तिमत्यपि ।
विश्वे विश्वेश्वरीं प्राहुः पुरुहूतां च पुष्करे ॥ ९॥

केदारपीठे सम्प्रोक्ता देवी सन्मार्गदायिनी ।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥ १०॥

स्थानेश्वरी भवानी तु बिल्वले बिल्वपत्रिका ।
श्रीशैले माधवी प्रोक्ता भद्रा भद्रेश्वरे तथा ॥ ११॥

वराहशैले तु जया कमला कमलालये ।
रुद्राणी रुद्रकोट्यां तु काली कालञ्जरे तथा ॥ १२॥

शालग्रामे महादेवी शिवलिङ्गे जलप्रिया ।
महालिङ्गे तु कपिला माकोटे(मर्कोटे) मुकुटेश्वरी ॥ १३॥

मायापुर्यां कुमारी स्यात्सन्ताने ललिताम्बिका ।
गंयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥ १४॥

उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ।
विपाशायाममोघाक्षी पाडला(पाटला) पुण्ड्रवर्धने ॥ १५॥

नारायणी सुपार्श्वे तु त्रिकुटे रुद्रसुन्दरी ।
विपुले विपुला देवी कल्याणी मलयाचले ॥ १६॥

सह्याद्रावकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ।
रमणा रामतीर्थे तु यमुनायां मृगावती ॥ १७॥

कोटवी कोटतीर्थे तु सुगन्धा माधवे वने ।
गोदावर्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥ १८॥

शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ।
रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने ॥ १९॥

देवकी मथुरायां तु पाताले परमेश्वरी ।
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥ २०॥

करवीरे महालक्षीरुमा देवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥ २१॥

अभयेत्युष्णतीर्थेषु नितम्बा विन्ध्यपर्वते ।
माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरीपुरे ॥ २२॥

छगलण्डे(छागलाण्डे) प्रचण्डा तु चण्डीकामरकण्टके ।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥ २३॥

देवमाता सरस्वत्यां पारावारातटे स्मृता ।
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ॥ २४॥

सिंहिका कृतशौचे तु कार्तिके त्वतिशाङ्करी ।
उत्पलावर्तके लोला सुभद्रा शोणसङ्गमे ॥ २५॥

माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे ।
जालन्धरे विश्वमुखी तारा किष्किन्धपर्वते ॥ २६॥

देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ।
भीमा देवी हिमाद्रौ तु तुष्टिर्विश्वेश्वरे तथा ॥ २७॥

कपालमोचने शुद्धिर्माता कामावरोहणे ।
शङ्खोद्धारे धरा (धारा) नाम धृतिः पिण्डारके तथा ॥ २८॥

कला तु चन्द्रभागायामच्छोदे शिवधारिणी ।
वेणायाममृता नाम बदर्यामुर्वशी तथा ॥ २९॥

औषधिश्चोत्तरकुरौ कुशद्वीपे कुशोदका ।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥ ३०॥

अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ।
गायत्री वेदवदने पार्वती शिवसन्निधौ ॥ ३१॥

देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती ।
सूर्यबिम्बे प्रभा नाम मातॄणां वैष्णवी मता ॥ ३२॥

अरुन्धती सतीनां तु रामासु च तिलोत्तमा ।
चित्ते ब्रह्मकला नाम शक्तिः सर्वशरीरिणाम् ॥ ३३॥

इमान्यष्टशतानि स्युः पीठानि जनमेजय ।
तत्सङ्ख्याकायस्तदीशान्यो देव्यश्च परिकीर्तिताः ॥ ३४॥

सतीदेव्यङ्गभूतानि पीठानि कथितानि च ।
अन्यान्यपि प्रसङ्गेन यानि मुख्यानि भूतले ॥ ३५॥

यः स्मरेच्छृणुयाद्वापि नामाष्टशतमुत्तमम् ।
सर्वपापविनिर्मुक्तो देवीलोकं परं व्रजेत् ॥ ३६॥

एतेषु सर्वपीठेषु गच्छेद्यात्राविधानतः ।
सन्तर्पयेच्च पित्रादीञ्छ्राद्धादीनि विधाय च ॥ ३७॥

कुर्याच्च महतीं पूजां भगवत्या विधानतः ।

क्षमापयेज्जगधात्रीं जगदम्बां मुहुर्मुहुः ॥ ३८॥

कृतकृत्यं स्वमात्मानं जानीयाज्जनमेजय ।
भक्ष्यभोज्यादिभिः सर्वान्ब्राह्मणान्भोजयेत्ततः ॥ ३९॥

सुवासिनीः कुमारीश्च बटुकादींस्तथा नृप ।
तस्मिन्क्षेत्रे स्थिता ये तु चाण्डालाद्या अपि प्रभो ॥ ४०॥

देवीरूपाः स्मृताः सर्वे पूजनीयास्ततो हि ते ।
प्रतिग्रहादिकं सर्वं तेषु क्षेत्रेषु वर्जयेत् ॥ ४१॥

यथाशक्ति पुरश्चर्यां कुर्यान्मन्त्रस्य सत्तमः ।
मायाबीजेन देवेशीं तत्तत्पीठाधिवासिनीम् ॥ ४२॥

पूजयेदनिशं राजन् पुरश्चरणकृद्भवेत् ।
वित्तशाठ्यं न कुर्वीत देवीभक्तिपरो नरः ॥ ४३॥

य एवं कुरुते यात्रां श्रीदेव्याः प्रीतमानसः ।
सहस्रकल्पपर्यन्तं ब्रह्मलोके महत्तरे ॥ ४४॥

वसन्ति पितरस्तस्य सोऽपि देवीपुरे तथा ।
अन्ते(अन्ते) लब्ध्वा परं ज्ञानं भवेन्मुक्तो भवाम्बुधेः ॥ ४५॥

नामाष्टशतजापेन बहवः सिद्धतां गताः ।
यत्रैतल्लिखितं साक्षात्पुस्तके वापि तिष्ठति ॥ ४६॥

ग्रहमारीभयादीनि तत्र नैव भवन्ति हि ।
सौभाग्यं वर्धते नित्यं यथा पर्वणि वारिधिः ॥ ४७॥

न तस्य दुर्लभं किञ्चिन्नामाष्टशतजापिनः ।
कृतकृत्यो भवेन्नूनं देवीभक्तिपरायणः ॥ ४८॥

नमन्ति देवतास्तं वै देवीरूपो हि स स्मृतः ।
सर्वथा पूज्यन्ते देवैः किं पुनर्मनुजोत्तमैः ॥ ४९॥

श्राद्धकाले पठेदेतन्नामाष्टशतमुत्तमम् ।
तृप्तास्तत्पितरः सर्वे प्रयान्ति परमां गतिम् ॥ ५०॥

इमानि मुक्तिक्षेत्राणि साक्षात्संविन्मयानि च ।
सिद्धपीठानि राजेन्द्र संश्रयेन्मतिमान्नरः ॥ ५१॥

पृष्टं यत्तत्त्वया राजन्नुक्तं सर्वं महेशितुः ।
रहस्यातिरहस्यं च किं भूयः श्रोतुमिच्छसि ॥ ५२॥

॥ इति श्रीमद्देवीभागवते महापुराणे सप्तमस्कन्धे
देवीपीठवर्णनं नाम त्रिंशोऽध्यायान्तर्गतं देवीसिद्धपीठानि ॥ ३०

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

---

*Devi Siddhapithas from Devi Bhagavatam*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*